सवाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥"
इति मूलेन दद्यात् १४ । प्रोक्षितनानाविधनैवेद्योपरि मत्स्यमुद्रया मूलं दशधा जप्त्वाभ्यर्च्य धेनुमुद्रयामृतीकृत्य ।
"ॐ सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम् ।
निवेदयामि देवेश सानुगाय गृहाण तत् ॥"
इति मूलेन दद्यात् १५ । जलमादाय ।
"ॐ समस्तदेवदेवेश सर्व्वतृप्तिकरं परम् ।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम् ॥"
इति मूलेन दद्यात् १५ । पूर्व्ववत् पुनराचमनीयञ्च । ताम्बूलं गृहीत्वा ।
"ॐ ताम्बूलं देवदेवेश कर्पूरादिसुवासितम् ।
कल्पयामि तवेशान वदनाम्भोजभूषणम् ॥"
इति मूलेन दद्यात् १५ । ततस्तत्तद्देवतानमस्कारमन्त्रैर्वन्दनं कुर्य्यात् । १६ । उपचारद्रव्याधारदाने साधारत्वेनोल्लेखः पृथग्वा तद्दानम् ।*। तत ॐ विष्णवे नमः इति त्रिः संपूज्य घण्टावितानतोरणयुक्तं वस्त्रादिच्छादितं वेश्म प्रोक्ष्य ॐ विष्णवे नमः इति त्रिः संपूज्य ॐ तद्विष्णोरित्यनेन विष्णुं स्मृत्वा ॐ तत् सदित्युच्चार्य्य वामहस्तेन धृत्वा कुशतिलजलान्यादाय अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्तृणकाष्ठादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहितत्वकामः श्रीविष्णुप्रीतिकामो वा एतत्तृणकाष्ठादिमयवेश्म विष्णुदैवतं विष्णवे तुभ्यमहं सम्प्रददे । इत्युत्सृजेत् । इष्टकादिमये तु एतदिष्टकादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रदशगुणकालावच्छिन्नस्वर्गलोकमहितत्वकाम एतदिष्टकादीतिविशेषः । एतत्प्रतिष्ठार्थं सुवर्णं तन्मूल्यं वा दक्षिणां विष्णवे दद्यात् । पश्चादाचार्य्यादौ प्रतिपत्तिः ।*। ततो देवं स्वयं गृहीत्वा गृहप्रदक्षिणं कारयित्वा ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः । इत्यनेनाभिमन्त्रितं देवं गृहं प्रवेशयेत् । ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तमाददे इति मन्त्रेण पिण्डिकोपरि न्यसेत् । ॐ स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्व्वन् पृथुर्भव सुसदस्त्वमग्ने पुरीषवाहनः । इत्यनेन स्थिरीकुर्य्यात् । पुनर्देवं संपूज्य यथाशक्ति चामरघण्टावितानगोहिरण्यग्रामवाद्यभाण्डादिकं दद्यात् । तत ॐ यावद्धराधरो देवो यावत्तिष्ठति मेदिनी । तावदत्र जगन्नाथ सन्निधीभव केशव ॥ इति मन्त्रं पठेत् । ततो ध्वजसमीपं गत्वा संप्रोक्ष्य तमारोपयेदनेन मन्त्रेण ॐ एह्येहि भगवन्नीश्वरविनिर्म्मित उपरिचरवायुमार्गानुसारिन् श्रीकर श्रीनिवास रिपुध्वंसकर सुजनाधिलय सर्व्वदेवतासम्मत कुरु शान्तिं स्वस्त्ययनञ्च मे भवतु सर्व्वविघ्नान् हर हर स्वाहा ॐ ध्वजाय नम इति ध्वजं संपूज्य ॐ विष्णवे नम इति त्रिरभ्यर्च्य ध्वजं संप्रोक्ष्य वामहस्तेन स्पृष्ट्वा अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा महापातकादिबहुपापक्षयकामो विष्णुप्रीतिकामो वा विष्णुवेश्मनि इमं ध्वजं विष्णुदैवतं विष्णवे तुभ्यमहं सम्प्रददे । इत्युत्सृज्य एतत्प्रतिष्ठार्थं दक्षिणां विष्णवे दद्यात् । पश्चादाचार्य्यादौ प्रतिपत्तिः । ततो गरुडस्तम्भं समारोप्य ॐ सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरो गायत्त्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोम आत्मा छन्दांस्यङ्गानि यजूंषि नाम सामते तनुर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याश्च शफाः सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वःपत ॥ यजुर्वेदी तु । ॐ सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्त्रं चक्षुस्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दांस्यङ्गानि धिष्णियाः शफाः यजूंषि नाम । सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुरः पत इति पठित्वा । ॐ गरुडाय नम इति त्रिःसंपूज्य ॐ नमस्ते पतगश्रेष्ठ पन्नगान्तकर प्रभो । त्वत्प्रसादान्महाबाहो मोदेयं दिवि देववत् ॥ यथा त्वं संपुटकरः सततं नतकन्धरः । तथैव पुरतो विष्णोस्त्वत्प्रसादाद्भवाम्यहम् ॥ इति पुटाञ्जलिः प्रार्थयेत् ॥*॥ ततः पिष्टप्रदीपादिना निर्म्मञ्छनं कुर्य्यात् । ततो विंशान्यूनब्राह्मणेभ्यो भोज्यानि दद्यात् । दीनानाथकृपणबधिरेभ्यो यथाशक्ति दद्यात् । ततः प्रीयतां पुण्डरीकाक्षसर्व्वयज्ञेश्वरो हरिः । तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत् ॥ ततो नृत्यगीतवादित्रनिस्वनमहोत्सवं कृत्वा अच्छिद्रावधारणं कृत्वा वैगुण्यसमाधानार्थं तद्विष्णोरिति विष्णुं स्मरेत् ।*। एवं रुद्रादिमठादिप्रतिष्ठायां आसनादिकन्तु तत्तन्मन्त्रं विहाय केवलं प्रणवादिनमोऽन्तेन तत्तन्नाम्ना दत्त्वा यथायोग्यं तत्तत्कर्म्मशेषं समापयेत् ।*। एवं गोपथादि प्रतिष्ठायां तत्समीपे वेदिकां कृत्वा तत्तत्फलकामो विष्णुप्रीतिकामो वा तत्तत्प्रतिष्ठां करिष्ये इति सङ्कल्प्य वृद्धिश्राद्धादिकं विधाय प्रागुक्तविधिनाग्निस्थापनादि एतत्कर्म्मणा प्रीयतां भगवान् विष्णुरित्यन्तं कर्म्म कृत्वा कूपादिवत् सर्व्वभूतेभ्य उत्सृज्य दक्षिणां दद्यात् ।*। नियमव्रतादिप्रतिष्ठायान्तु विष्णुरित्यन्तं कर्म्म कृत्वा व्रतानुष्ठानं कृत्वा दक्षिणादिकं कुर्य्यात् ।*। ततो घटस्थजलेन यजमानमभिषिञ्चेत् । तद्यथा,—
"ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥
आखण्डलोऽग्निर्भगवान् यमो वै नैरृतस्तथा ।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः पुष्टिश्च मातरः ।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः ।
ऋषयो मुनयो गावो देवमातर एव च ॥
देवपत्न्योऽध्वरा नागा दैत्याश्चाप्सरसां गणाः ।
अस्त्राणि सर्व्वशास्त्राणि राजानो वाहनानि च ॥
औषधानि विचित्राणि कालस्यावयवाश्च ये ।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एतास्त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये ॥"*॥

इति मठादिप्रतिष्ठाप्रयोगतत्त्वं समाप्तम् ॥

(पक्वखाद्यवस्तुविशेषः । अस्य पाकप्रकारो यथा,
"समिता मर्द्दयेदन्यज्जलेनापि च सन्नयेत् ।
तस्यास्तु वटिकां कृत्वा पचेत सर्पिषि नीरसम् ॥
एला लवङ्गकर्पूरमरीचाद्यैरलङ्कृतं ।
मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत् ॥
अयम्प्रकारः संसिद्धो मठ इत्यभिधीयते ॥"
[सन्नयेन्मर्द्दयेत्] तथास्य गुणाः ॥
"मठस्तु बृंहणो वृष्यो बल्यः सुमधुरो गुरुः ।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मठरः, पुं, (मन्यते मनुतेऽवबुध्यते इत्यर्थः । मन+"वचिमनिभ्यां चिच्च ।" उणा० ५ । ३९ । इति अरचित् ठश्चान्तादेशः ।) मुनिविशेषः । इत्युणादिकोषः ॥ (शौण्डः । मठरो मुनिशौण्डयोरित्युज्ज्वलदत्तः ॥)

मड इ क मोदे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इ मण्डयति । इति दुर्गादासः ॥

मड इ कि भूषे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) मण्डयति मण्डति हारो जनम् । इ मण्ड्यते । इति दुर्गादासः ॥

मड इ ङ विभागे । वेष्टे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) इ मण्ड्यते ङ मण्डते । इति दुर्गादासः ॥

मड्कः, पु, (मण्डयति भूषयति क्षेत्रमिति । मडि +"कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि ।" उणा० २ । ३२ । इति कुन् । पृषोदरादित्वान्नलोपः ।) शस्यभेदः । मेडुया इति भाषा । इति जटाधरः ॥

मड्डुः, पुं, वाद्यविशेषः । इत्यमरः । १ । ७ । ८ ॥ घुघूक इति ख्यातः । विपुलो डमरुर्मड्डुरिति कोषः ॥ मड् इति रौति इति मड्डुः पूर्व्ववद्रौतेर्डुः मनीषादित्वान्नेपस्य डत्वम् । मज्जन्ति शब्दा अत्रेति मज्जेर्निपातो वा । इति भरतः ॥

मड्डुकः, पुं, (मड्डुरेवेति मड्डु+स्वार्थे कन् ।) मड्डुवाद्यम् । इति त्रिकाण्डशेषः ॥

मण कूजे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) मणति । कूजेऽव्यक्तशब्दे । इति दुर्गादासः ॥

मणिः, पुं, स्त्री, (मण+"सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इतीन् ।) अश्मजातिः ।